Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 2 | ISSN : 2582-0095

# अनुसूचितजाति जनजाति छात्राणां शैक्षिकविकासे पाठ्यक्रमसहगामिक्रियाणां महत्वम्

Pramod Kumar Das
Research Scholar, Department of Education, Rashtriya Sanskrit Vidyapeetha, Tirupati, India

**शोधसारांश:** - विद्यालये पाठ्यसहगामिक्रियानां द्वारा अनुसूचितजाति जनजाति छात्राणामध्यापनं रूचिपूर्णं तथा आकर्षकं भवति। कक्ष्यायां चरित्रव्रतानां महापुरुषाणां विषयज्ञापनेन छात्रा: चरित्रमन्तो भवितुम् अर्हति। गान्धीमहोदय: श्रीरामचन्द्र:, सत्यहरिश्चन्द्र: इत्यादिमहापुरुषाणां चरित्र्यं नाटकसाहाय्येन ज्ञापयितुं शक्यते। एतासां क्रियाणां द्वारा छात्रा: स्वार्थचिन्तनं त्यक्त्वा सन्मार्गे गच्छन्ति। उचितपाठ्यपुस्तकानां पठनेन छात्राणां वौद्धिकविकास: भवति। क्रीडा, व्यायाम: इत्यादीनां कार्यक्रमाणाम् आयोजनेन शारीरिकविकास: भवति। विद्यालये दैवकीर्तनं, दैवप्रार्थना भगवद्गीता इत्यादीनां ग्रन्थपठने छात्राणां आध्यात्मिकिकास: भवति, पत्रलेखनम्, कथालेखनम् इत्यातिकार्यक्रमाणां निर्वहणेन छात्राणां रचनात्मकविकास: भवति। विद्यालये चित्रलेखनं काव्यादि कार्यक्रमाणां सास्कृतिककार्यक्रमाणाम् इत्यादिपाठ्यसहगामिक्रियाणां द्वारा छात्राणां सर्जनात्मक: सास्कृतिक: मानसिक: तथा सर्वाङ्गीणविकास: भवति। तर्हि विद्यालये पाठ्यक्रमसहगामिक्रियाणाम् आयोजनस्य महत्त्वम् अस्ति।

**विशेषशब्दा:**- सामाजिकोद्देश्यपूर्ति, किशोराणां समयस्य सदुपयोग:,पाठ्यविषये सहायभूता:, चारित्रिकविकास:, नागरिकताया: विकास:, अवकाशस्य सदुपयोग:, बौद्धिकविकास:, शरीरकविकास:, आध्यात्मिकविकास:, सर्जनात्मकविकास:, रचनात्मकविकास:, सांस्कृतिकविकास:, मानसिकविकास: इत्यादय:।

---

प्राचीनकाले केवलं पुस्तकपठनं पूस्तकीयज्ञानार्जनमेव शिक्षा इति शिक्षाया: आशय: आसीत्। क्रीडा इत्यादि क्रियाणां प्रोत्साहनं नासीत्। तासां क्रियाणां समय: व्यर्थ: इति आलोचनासीत्। परन्तु शनै: शनै: शिक्षाशास्त्रज्ञा: पाठ्यक्रमातिरिक्त विषयाणां तथा क्रियाणां महत्त्वं स्वीकृतवन्त:। तादृशविषया: ता: क्रिया: एव पठ्यक्रमसहगामिक्रिया: अभवन्। वादविवाद:, साहित्यिककार्यक्रम: विद्यालयपत्रिका, सङ्गीत तथा नृत्यम्, परिभ्रमणं, NCE,NSS,Scout and Guide इत्येता: वालकानां सर्वाङ्गीण विकासाय उपकुर्वन्ति। तद्यथा –

1. **सामाजिकोद्देश्यपूर्ति** (Social ObectiveFulfillment)– समाजसेवया सामाजिकोद्देश्यस्य सम्पूर्ति: जायते। समाजकल्याणाय च समाजसेवा अत्यन्तम् आवश्यिकी वर्तते। समाजसेवया छात्राणां व्यावहारिकज्ञानं भवति। समाजसेवया मानवानां स्वास्थ्यसंरक्षणं कर्तुं शक्यते। किञ्च जना: योग्यशालिन: भवितुमर्हन्ति। समाजसेवया छात्रा: स्वयं विनयसम्पन्ना: भवन्ति। एवं परस्परसम्मेलनेन सुसम्पर्क: भवति। तथा मिथ: अवगाहनेन स्वजीवनं सफलं कर्तुं शक्नुवन्ति ।
2. **किशोराणां समयस्य सदुपयोग**:(Mahing good use of children's time)- किशोरावस्थायां छात्राणाम् उचितप्रकारमार्गप्रदर्शनेन तान् सन्मार्गे स्थापयितुं शक्नुम:। उचितमार्गप्रदर्शनाभावे तेषां समयस्यदुरुपयोग: भवति। एवं तेषां जीवनं निष्फलञ्च भवति।
3. **पाठ्यविषये सहायभूता**: (Helpful in the Subject of the text)- पाठ्यसहगामिक्रियाणां द्वारा अध्यापनं रुचिपूर्णं तथा आकर्षकं भवति। यथा क्रीडया विषयज्ञापनं भवति तथा निबन्धवादविवादै: विषयज्ञापनं भवति। अभिनयपूर्वकम्

अध्यापनं भवति। कक्ष्यायां कदाचित् अभिनयेन पाठ्यविषयं ज्ञापयितुं शक्यते। एवम् अध्ययनअध्यापने पाठ्यसहगामिक्रिया: सहायभूता: भवन्ति ।

4. **चारित्रिकविकासः** (character development)- पाठ्यसहगामिक्रियाणां द्वारा चारित्रिकविकास: अपि भवति। कक्ष्यायां चरित्रव्रतानां महापुरुषाणां विषयज्ञापनेन छात्रा: चरित्रमन्तो भवितुमर्हन्ति। गान्धीमहोदय:, श्रीरामचन्द्र:, सत्यहरिश्चन्द्र: इत्यादिमहापुरुषाणां चारित्र्यं नाटकप्ताहाय्येन ज्ञापयितुं शक्यते। एतासां क्रियाणां द्वारा छात्रा: स्वार्थचिन्तनं त्यक्त्वा सामूहिकलाभाय चिन्तयन्ति। एवं ते न्यायप्रिया: भवन्ति। आत्मानुशासिन: भवन्ति सन्मार्गे गच्छन्ति ।

5. **नागरिकताया: विकासः**(The development of Citizenship)- पाठ्यक्रमसहगामिक्रियाणां द्वारा छात्राणां नागरिकताया: विकाश: भवति। एवं स्वशासनबद्धा: भवन्ति। सामाजिकव्यवहारसम्पन्ना: भवन्ति। सम्भाषणे कुशला: भवन्ति। सर्वेषां नागरिकाणाम् आनन्दवर्धका: अपि भवन्ति ।

6. **अवकाशस्य सदुपयोगः**(Good use of leisure time)- पाठ्यसहगामिक्रियाणां द्वारा अवकाशस्य सदुपयोग: कर्तुं शक्यते। यदि अवकाशस्य सदुपयोग: न भवति तेषां गमनं अपमार्गे चलति। जीवनमपि व्यर्थं भवति। अवकाशस्य सदुपयोगेन समाजे अनुशासनसंरक्षणं भवति। एवं मूलप्रवृत्तीनां संशोधनमपि भवति ।

7. **नेतृत्वस्य विकासः**:- पाठ्यसहगामिक्रियाणां द्वारा नेतृत्त्वभावनाया: विकाश: भवति। यथा तेषां विद्यालये उचितविषयाणां ज्ञापनेन उचितमार्गप्रदर्शनेन सच्चरित्रव्रतानां चरितस्य अध्यापनेन तेषां नैतिकताया: विकास: भवति ।

8. **बौद्धिकविकासः**:- उचितपाठयपुस्तकानां पठनेन छात्राणां बौद्धिकविकास: भवति।

9. **शरीरकविकासः**:- पाठ्यसहगामिक्रियाणां द्वारा छात्राणां शारीरकविकास: भवति। क्रीडा, व्यायाम: इत्यादीनां कार्यक्रमाणाम् अयोजनेन शारीरकविकास: भवति।

10. **आध्यात्मिकविकासः**:- विद्यालये दैवचिन्तनं, दैवकीर्तनं, दैवप्रार्थना, आध्यात्मिकग्रन्थपठनम् (भगवद्गीता इत्यादीनां) इत्यादीनाम् आध्यात्मिकविकास: भवति ।

11. **रचनात्मकविकासः**:- विद्यालयेव्यासरचना, पत्रलेखनं, कथालेखनम् इत्यादिकार्यक्रमाणां निर्वहणेन छात्राणां रचनात्मकविकास: भवति ।

12. **सर्जनात्मकविकासः**:- विद्यालये चित्रलेखनम् काव्यादिकार्यक्रमाणां निर्वहणेन सर्जनात्मकताया: विकास:
भवति।

13. **सांस्कृतिकविकासः** - सांस्कृतिककार्यक्रमाणाम् आयोजनेन सांस्कृतिक विकास: भवति।

14. **मानसिकविकासः**:- पाठ्यक्रमसहगामिक्रियाणां द्वारा छात्राणां मानसिकविकास: भवति। उपर्युक्तप्रकारेणपाठ्यक्रमसहगामिक्रियाणां द्वारा बालकानां सर्वाङ्गीणविकास: भवति।

**पाठ्यक्रम-सहगामिक्रियाणां प्रकारा:**

1. साहित्यिकक्रिया: ।
2. वादविवाद:।
3. विद्यालयपत्रिका ।
4. सङ्गीतं तथा नृत्यम् ।
5. क्रीडा – शारीरकिव्यायाम: ।

6. छात्रसमितिः ।
7. परिभ्रमणं तथा सरस्वतीयात्रा।
8. बालचरसंघः ।
9. बालिका–गाइड्
10. प्रियव्यापारः ।
11. रेडक्रास तथा प्राथमिकसहायता ।

**1.साहित्यिकक्रिया:-** साहित्यिक क्रियाणाम् आयोजनेन छात्राः अन्तर्निहितभावान् बहिः प्रकाशयितुं शक्नुवन्ति। एतादृशक्रियाणां द्वारा मानसिकविकासः एवं साहित्यविकासः भवति।

**2. वाद-विवादः तथा भाषणकला:-** वादविवादेन छात्राः मौखिकरूपेण तेषाम् आत्मप्रदर्शनं कर्तुं शक्नुवन्ति। पर्याप्तरूपेण विषयप्रकटनाय अवसरः मिलति। वादविवादसमये ज्ञानार्जने ते उत्सुकाः भवन्ति। वादविवादः अन्येषामपि मनोरञ्जको भवति। वादविवादेन छात्राः भाषणे निपुणाः भवन्ति ।

**3. विद्यालयपत्रिका:-** पत्रिकादीनां द्वारा तेषां भावनाः प्रकटीकर्तुं शक्नुवन्ति। पत्रिकादीनां पठने न तेषां मानसिक–बौद्धिक – चारित्रिक–सामाजिकेति सर्वाङ्गीणविकासः भवति। रचनात्मक सर्जनात्मकशक्तेः विकासः भवति। लेखनकौशलं वर्धेत।

**4. सङ्गीतं तथा नृत्यम्-** संगीतनृत्यकार्यक्रमाणां द्वारा छात्राः मनोरञ्जकाः भवन्ति। तेषां मानसिकविकासः भवति। संगीतकलायाः विकासः भवता। नृत्य–अभिनयकौशलयोः विकासः भवति। सङ्गीतश्रवणेन छात्राणां स्वास्थ्यं सम्यक् भवति। एवं नाटकादीनां प्रदर्शनेन उचितज्ञानसम्पन्नाः भवन्ति। तथा सामाजिकज्ञानं भवति। चारित्रिकविकाशः भवति।

**5. क्रीडा तथा शारीरकव्यायाम:-** क्रीडया छात्राणां विषयज्ञापनं भवति। क्रीडया गणितशास्त्रं ज्ञापयितुं शक्यते। सामाजिकविकासः भवति। शारीरकविकाशः भवति। शारीरकव्यायामेन स्वास्थ्यं समीचीनंभवति। स्वस्थेशरीरे स्वस्थं मनः इत्युक्तरीत्या यस्य स्वास्थ्यं समीचीनं भवति, तस्य मनः अपि स्वस्थं भवति। एवं यदि स्वास्थ्यं समीचीनं भवति तर्हि तेषां जीवनम् आनन्दमयं एवं शोभायमानं भवति।

**6. छात्रसमिति:-** छात्रसमितीनां द्वारा विविधस्तरेषु पाठ्यक्रमसहगामि क्रियाणाम् आयोजनेन ज्ञानार्जनं भवति। यथा वाद–विवादः, अन्त्याक्षरी इत्यादिकार्यक्रमाणाम् आयोजनेन।

**7. परिभ्रमणं तथा सरस्वतीयात्रा:-** सरस्वतीयात्रया ज्ञानार्जनं भवति। समाजिकविकासः भवति। व्यवहारकौशलम् आयाति। ये विषयाः अध्यापनेन नाधिगम्यन्ते ते विषयाः परिभ्रमणेन ज्ञापयितुं शक्यन्ते। छात्राः। वास्तविकज्ञानसम्पन्नाः भवन्ति। प्रत्यक्षतया वास्तविकरूपं द्रष्ट शक्नुवन्ति। आनन्दं प्राप्तुं शक्नुवन्ति। परिभ्रमणेन चरित्रिक भौगोलिकविषयाणाम् अवगाहन तथा विकाशः भवति। एवं परिभ्रमणेन सरस्वतीयात्रया च अनेके विषयाः ज्ञापयितुं शक्यन्ते।

**8. बालचरसंध:-** बालचरसंधस्य आयोजनेन समाजसेवायाः अवकाशो भवति। समाजसेवया सद्गुणसम्पन्नाः भवन्ति। सत्संगस्य विकासः भवति। समये समये सन्दर्भानुसारं वनभ्रमणेन प्राकृतिकसौन्दर्यम अनुभवन्ति। पर्वतारोहणेन आनन्दम् अनुभवन्ति। बाह्यवातावरणज्ञानमपि भवति। सत्यवाक्यपरिपालकाः, देशभक्तिपूर्णाः ईश्वरभक्तिपूर्णाश्च भवन्ति ।

**9.बालिका-गाइड -** तासां नृत्य–संगीत–गृहविज्ञानादिविषयाणां ज्ञापनं भवति। तासु स्वास्थ्यविज्ञानं, समाजसेवाइत्यादिविषयाणां विकासो जायेत ।

**10. प्रियव्यापाराः** - समयस्य सदुपयोगाय प्रियव्यापाराणाम् आयोजनम् आवश्यकं भवति। भाषणं, लेखनं, गानं, क्रीडा, परिभ्रमणं, नृत्यं, संगीतं, पठनम् इत्यादिप्रियव्यापाराः भवन्ति।

**11. रेडक्रास तथा प्राथमिकसहायता-** रेडक्रास-संस्थानाम् अत्यधिकं महत्त्वम् अस्ति। प्राथमिकचिकित्सायाः ज्ञानं मिलति। विद्यालये तथा छात्रावासे एतादृशकार्याणाम् आयोजनम् आवश्यकं वर्तते। एवं प्रकारेण विद्यालये पाठ्यक्रमसहगामिक्रियाणाम् आयोजनस्य महत्त्वम् अस्ति। प्रधानाध्यापकस्य कर्तव्यम् उत्तरदायित्वं च अस्ति यत् पाठ्यक्रमसहगामिक्रियाणां पाठ्यक्रमे समुचितस्थानं, तदर्थं समुचितव्यवस्थायाः च परिकल्पनं इति।

**परिशीलितग्रन्थसूची**


1. शिक्षायाः व्यवस्थापना प्रयुक्तिविद्याञ्च, ड. कर तुहिनकुमारः, ड. मण्डल भीमचन्द्रः, रीता पाब्लिकेशन्, कोलकाता, 2010
2. शिक्षातत्व शिक्षादर्शनञ्च, सुशीलराय, सोमा बुक एजेन्सी, कोलकाता, 2010
3. तट्टा, टि. के(1998) संस्कृतच्छात्राध्यापकानां पुनर्बलनकौशलविकासे सूक्ष्मशिक्षणप्रभावः (शिक्षाचार्योपाध्यर्थः लघुशोधप्रबन्धः) Unpublished M.edDissertation, Rashtriya Sanskrit Vidyapeetha, Tirupati.
4. भट्टः, वि. (2003) संस्कृतच्छात्राध्यापकानां प्रश्नकरणकौशलविकासे सूक्ष्मशिक्षणस्य प्रभावः (शिक्षाचार्योपाध्यर्थः लघुशोधप्रबन्धः)Unpublished M.ed Dissertation, Rashtriya Sanskrit Vidyapeetha, Tirupati
5. मिश्र, जि (1999) विभिन्नसंस्कृतभाषाध्यापकप्रशिक्षणकार्यक्रमाणां मूल्याङ्कनात्मकमध्ययनम्। Unpublished Doctoral Dissertation, Rashtriya Sanskrit Vidyapeetha, Tirupati
6. रा. देवनाथः, . भुवनेश उपाध्यायः – व्याकरणयशिक्षणविधयः
7. शर्मा वि. मुरलीधर – संस्कृतशिक्षकप्रशिक्षणे सूक्ष्मशिक्षणम्
8. Agarwal : Micro Teaching: An Appraisal, Indian Education, AIFEA.
9. ALLEN. D.W (1966) Microteaching – A Description. Stanford University. California,
10. Blowers E.A. (1979): Problems in Practice Teaching, Indian Education AIFEA.
11. The Scheduled Tribes, Ghurey, G.S, Popular Book Depo, Bombay, 1959